ॐ

# ॥ श्रीमद्भगवत्पतञ्जल्यष्टोत्तरशतनामावलिः ॥

## ध्यानम्

ॐ योगशास्त्रप्रणेतारं शब्दविद्याप्रकाशकम्।
आयुर्विद्याप्रवक्तारं प्रणमामि पतञ्जलिम्॥
चेतःशब्दशरीराणां शोधकं देशिकोत्तमम्।
भक्त्या नत्वा मुनिं नाम्नामष्टोत्तरशतं ब्रुवे॥

ॐ श्रीमत्पतञ्जलिमहामुनये नमः। १॥
ॐ योगिवर्याय नमः। २॥
ॐ योगोपदेशकाय नमः। ३॥
ॐ योगपदव्याख्यात्रे नमः। ४॥
ॐ वृत्तिभेदबोधकाय नमः। ५॥
ॐ ईश्वरप्रणिहितचित्ताय नमः। ६॥
ॐ प्रणवोपासकाय नमः। ७॥
ॐ प्रणवतत्त्वदर्शिने नमः। ८॥
ॐ जपविधायिने नमः। ९॥
ॐ योगसाधनोपदेशकाय नमः। १०॥

ॐ शब्दतत्त्वप्रकाशकाय नमः। ११॥
ॐ शब्दविद्याफलवक्त्रे नमः। १२॥
ॐ वाग्योगविदे नमः। १३॥
ॐ श्रुत्यर्थानुग्राहकाय नमः। १४॥
ॐ सूत्रवाक्यार्थसेतवे नमः। १५॥
ॐ धर्मनियमावगमकाय नमः। १६॥
ॐ शब्दोपलब्धिदर्शकाय नमः। १७॥
ॐ दृष्टान्तोपकल्पकाय नमः। १८॥
ॐ न्यायकदम्बाख्यात्रे नमः। १९॥
ॐ सूत्राक्षरमर्मविदे नमः। २०॥

ॐ आयुर्विद्यादेशिकाय नमः। २१॥
ॐ क्लेशपञ्चकविदूराय नमः। २२॥
ॐ अविद्यापदशोधकाय नमः। २३॥
ॐ कर्मफलनिवृत्त्यै नमः। २४॥
ॐ हेयोपादेयज्ञात्रे नमः। २५॥
ॐ योगाङ्गोपदेशकाय नमः। २६॥
ॐ योगाङ्गफलवक्त्रे नमः। २७॥
ॐ योगसाधनसन्देशाय नमः। २८॥
ॐ योगपथानुवृत्ताय नमः। २९॥
ॐ योगीश्वराय नमः। ३०॥

ॐ वाग्दोषविदे नमः। ३१॥
ॐ पाणिन्याहितभावाय नमः। ३२॥
ॐ लोकभाषणविदुषे नमः। ३३॥
ॐ श्रुत्यर्थाभिधात्रे नमः। ३४॥

ॐ शब्दलक्षणवक्त्रे नमः । ३५ ॥
ॐ गुरुलाघवविदे नमः । ३६ ॥
ॐ सर्वशाखाविज्ञात्रे नमः । ३७ ॥
ॐ सूत्रविवेचकाय नमः । ३८ ॥
ॐ शब्दग्रन्थोपजीव्याय नमः । ३९ ॥
ॐ अक्षरानुव्याख्यात्रे नमः । ४० ॥

ॐ सूत्रानर्थक्यनिराकर्त्रे नमः । ४१ ॥
ॐ विशेषप्रतिपत्तिहेतुदर्शिने नमः । ४२ ॥
ॐ पदसम्बन्धज्ञाय नमः । ४३ ॥
ॐ बहुकल्पप्रदर्शकाय नमः । ४४ ॥
ॐ सर्वलक्ष्याभिज्ञाय नमः । ४५ ॥
ॐ वाक्याशयवर्णनपराय नमः । ४६ ॥
ॐ सहस्रजिह्वाय नमः । ४७ ॥
ॐ आदिशेषावताराय नमः । ४८ ॥
ॐ विचारधाराधराय नमः । ४९ ॥
ॐ शब्दार्थभेदाभेददर्शिने नमः । ५० ॥

ॐ समाधिभेदभृते नमः । ५१ ॥
ॐ प्रशान्तसिद्धिदायकाय नमः । ५२ ॥
ॐ चित्तैकाग्रतापरिणामवक्त्रे नमः । ५३ ॥
ॐ अध्यासभेदनिरूपकाय नमः । ५४ ॥
ॐ योगभेदोपबृंहकाय नमः । ५५ ॥
ॐ योगविभूतये नमः । ५६ ॥
ॐ योगसोपानकल्पकाय नमः । ५७ ॥
ॐ अणिमादिसिद्धिदाय नमः । ५८ ॥
ॐ कैवल्यपथदर्शिने नमः । ५९ ॥
ॐ वैराग्यहेतुबोधकाय नमः । ६० ॥

ॐ मुनिश्रेष्ठाय नमः । ६१ ॥
ॐ मुनिवन्दिताय नमः । ६२ ॥
ॐ दोषत्रयापहर्त्रे नमः । ६३ ॥
ॐ गोनर्दीयाय नमः । ६४ ॥
ॐ गोणिकापुत्राय नमः । ६५ ॥
ॐ योगसूत्रकृते नमः । ६६ ॥
ॐ महाभाष्यनिर्मात्रे नमः । ६७ ॥
ॐ वैद्यशास्त्रप्रवर्तकाय नमः । ६८ ॥
ॐ व्याख्यानिपुणाय नमः । ६९ ॥
ॐ योगिगम्याय नमः । ७० ॥

ॐ अखण्डार्थविदे नमः । ७१ ॥
ॐ क्रियास्वरूपबोधकाय नमः । ७२ ॥
ॐ सांख्यतत्त्वविदे नमः । ७३ ॥
ॐ कालविभागदर्शकाय नमः । ७४ ॥
ॐ सूक्ष्मकालवेदिने नमः । ७५ ॥
ॐ कारकपदव्याख्यात्रे नमः । ७६ ॥
ॐ द्रव्यपदनिर्वाचकाय नमः । ७७ ॥
ॐ स्फोटभेदाभिधायिने नमः । ७८ ॥
ॐ शब्दगुणवक्त्रे नमः । ७९ ॥
ॐ ध्वनिभेददर्शकाय नमः । ८० ॥

ॐ कुणिदर्शनाश्रिताय नमः । ८१ ॥
ॐ विधिनिपातार्थवक्त्रे नमः । ८२ ॥
ॐ सूक्ष्मविचारशीलाय नमः । ८३ ॥
ॐ लोकवाक्यविशारदाय नमः । ८४ ॥
ॐ लोकवन्दिताय नमः । ८५ ॥
ॐ ध्यानमग्नाय नमः । ८६ ॥

ॐ प्रसन्नचित्ताय नमः। ८७॥
ॐ प्रसन्नवदनाय नमः। ८८॥
ॐ प्रसन्नवपुषे नमः। ८९॥
ॐ पूतान्तःकरणाय नमः। ९०॥

ॐ कैवल्यदर्शिने नमः। ९१॥
ॐ सिद्धिभेददर्शिने नमः। ९२॥
ॐ ध्यानस्वरूपाभिधायकाय नमः। ९३॥
ॐ चित्तसङ्करविदूराय नमः। ९४॥
ॐ चित्तप्रसादनदर्शकाय नमः। ९५॥
ॐ योगपटलाभिधात्रे नमः। ९६॥
ॐ क्लेशकर्मनिवर्तकाय नमः। ९७॥
ॐ स्वरूपस्थिताय नमः। ९८॥
ॐ परमकारुणिकाय नमः। ९९॥
ॐ विवेकख्यातये नमः। १००॥

ॐ महर्षये नमः। १०१॥
ॐ महायोगिने नमः। १०२॥
ॐ मोक्षपथदर्शकाय नमः। १०३॥
ॐ मुमुक्षुजनवन्दिताय नमः। १०४॥
ॐ अमोघफलदात्रे नमः। १०५॥
ॐ नतजनवत्सलाय नमः। १०६॥
ॐ त्रिकरणशुद्धिदाय नमः। १०७॥
ॐ महायोगीश्वरेश्वराय नमः। १०८॥

## फलश्रुतिः

ॐ श्रीपातञ्जलमिदं नाम्नामष्टोत्तरशतं तु ये।
भक्त्या युक्ताः पठेयुस्ते प्राप्नुवन्ति परं पदम्॥

## इति श्रीमद्भगवत्पतञ्जल्यष्टोत्तरशतनामावलिः